नाड़ी विज्ञानम् — of कणाद महर्षि with the commentary of वैद्य हरिहरनाथ शास्त्री — Edited by पं. वैद्यनाथ शास्त्री. Moradabad, 1960 Vikram era.

~~2 copies~~

1390

10

Bill No. 3/07-08

155

2008-0320

Indira Gandhi National Centre for the Arts

श्रीः ॥

# नाड़ीविज्ञानम्

## श्रीकणादमहर्षिणा प्रणीतम्

मुरादाबादनिवासिनेन्द्रप्रस्थस्थबनवारीलालायुर्वेद-
विद्यालयाध्यापकेन सांख्याचार्येतिप्राप्तपदकेन

## वैद्यहरिहरनाथशास्त्रिणा

विरचितसँस्कृतटीकोपेतम्

Indira Gandhi National
Centre for the Arts

तच्च

वैद्यनाथशास्त्रिणा

संशोधितम्

मुरादाबादस्थतन्त्रप्रभाकरनामकमुद्रणयंत्रे षष्ठ्यधिकै-
कोनविंशतिशततमे विक्रमीयेऽब्दे मुद्रितम् ॥

1390

DATA ENTERED
Date..24/06/08..........

SANS
615.536
KAN

# तंत्रांतरस्था नाडीज्ञानोपयोगिनः श्लोकाः सन्ति

रोगमादौ परीक्षेत तदनन्तर मोषधम् ।
ततः कर्म भिषक् पश्चान्ज्ञानर्वं समाचरेत् ॥ १ ॥
लक्षयित्वा देशकालौ ज्ञात्वा रोगबलाबलम् ।
चिकित्सामारभेद्वैद्यो यशः कीर्तिमवाप्नुयात् ॥ २ ॥
रुग्णावस्थां ततो नाडीं भेषजं पथ्यमेव च ।
देशकालञ्च पात्रंच यो जानाति स वैद्यराट् ॥ ३ ॥
रोगाक्रान्तशरीरस्य स्थानान्यष्टौ परीक्षयेत् ।
नाडी मूत्रं मलं जिह्वां शब्दस्पर्शदृगाकृतिम् ॥ ४ ॥
आदौ सर्वेषु रोगेषु नाडीजिह्वाग्र नेत्रकम् ।
मूत्रार्तवं परीक्षेत पश्चाद्रुग्णां चिकित्सयेत् ॥ ५ ॥
निदानपंचकादीनां लक्षणं वैद्यसत्तमः ।
नाडीन्तु संबलीकृत्य चिकित्सामाचरेत्खलु ॥ ६ ॥
परीक्षणीयाः सततं नाडीनां गतयः पृथक् ।
नचाध्ययनमात्रेण नाडीज्ञानं भवेदिह ॥ ७ ॥
हिंस्रा स्नायुर्वसा नाडी धमनी धामनी धरा ।
तन्तुकी जीवतज्ञा च शिरा पर्यायवाचकाः ॥ ८ ॥
क्वचिद्ग्रन्थानुसंधानाद्देशकालविभागतः ।
क्वचित्प्रकरणाच्चापि नाडीज्ञानं भवेदिति ॥ ९ ॥

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-320
Date: 25-3-08

* श्रीगणेशायनमः *



# अथ नाडीविज्ञानम्.

यद्वक्त्रेभ्यः पञ्चसंख्यागतेभ्यो ।
वेदा जाता ऋग्यजुःसामरूपाः ॥
सायुर्वेदाऽथर्ववेदश्च तस्मिन् ।
आस्तां शम्भौ श्रीकणादस्य भक्तिः ॥ १ ॥

खल्विह वैशेषिककर्त्ता श्रीकणादः श्रोतॄणामध्येतॄणाञ्च विघ्नविनाशाय मंगलमातनोति यद्वितिग्रन्थेन शिष्यशिक्षायै ग्रंथादौ निबध्नाति च पंचसंख्यागतेभ्यः सद्योजातवामदेवाघोरतत्पुरुषेशाननाम्ना पञ्चसंख्यां प्राप्तेभ्यः । यद्वक्त्रेभ्यः । यस्य शिवस्य । मुखेभ्यः पञ्चवक्त्रेभ्य इत्यर्थः । ऋग्यजुःसामरूपा वेदा जाताः (१)

---

( १ ) नियताक्षरपादयुतो देवदैवत्यः एकविंशतिशाखात्मको वेदभागः ऋग् ऋच्यन्ते स्तूयन्ते देवा अनया ऋच स्तुतौ क्विप् । गीतिरहिताऽनियताक्षरपादो वेदभागो यजुः ॥ इज्यते अनेन अर्तिपृवपियजितनिधनितापिनेदित्युसिः । सहस्रशाखः पितृदैवताको वेदविशेषः सामवेदः चतुर्णां वेदानां मध्ये गानमाधुर्येणातिरमणीयत्वाद्विष्णोर्विभूतिः सामेत्युच्यते, ।

सायुर्वेदाथर्ववेदश्च जातः । ( २ ) तस्मिन्शम्भौ महादेवे शं सुखं भवति भावयति वा मितद्वादित्वाहुः । श्रीकणादस्य वैशेषिकदर्शनकर्तुर्मुनेः ( ३ ) भक्तिः । अनुरागः आस्ताम् ॥ १ ॥

आस्ते वेदः पञ्चमो वैद्यकाख्यो
वेत्ता कश्चित्तस्य नास्ते महेशात् ।
तस्माद्धाताऽध्यैष्ट तस्मात्तुराषाट्
तस्माज्ज्ञात्वा वक्तुमर्हामि शास्त्रम् ॥ २ ॥

वैद्यकाख्यो वैद्यकशास्त्रम् । पञ्चम वेदः अथर्ववेदस्योपांगभूत; ॥ आस्ते परन्तु कश्चिद् । कोऽपि मनुजः । महेशात् शम्भोः सकाशात् ॥ वेत्ता आयुर्वेदतत्वज्ञो नास्ते. ननु तर्हि कथमाविर्भावः इत्याशङ्कायामाह धाता, प्रजापतिः तस्मात् महेशनाम्नः जगदीशात् अध्यैष्ट अपाठीत् । तुराषाट् तुतोर्ति इतितुर इगुपधेतिकः तुरंवेगवन्तं साहयति अभिभवति ण्यन्तात्सहेः क्विप् सहेः साडःसः इति षत्वम् अन्येषामपीति पूर्वपदस्यदीर्घः अप्रेक्षणो वा तस्माद् ब्रह्मणः अध्यैष्ट पठितवान् इन्द्रो ब्रह्माणमेव गुरुत्वेन निर्णीय तज्ज्ञानं लेभे, अहं—कणादः तस्मात् तुरासाहः इन्द्रस्य सकाशात् । ज्ञात्वा सम्यक् ज्ञानं लब्ध्वा शास्त्रम् नाडीविज्ञानरूपम् वक्तुम् ।

( २ ) आयुः शरीरेन्द्रिय. सत्वात्मसंयोगस्तदस्मिन्विद्यते, अनेनवायुरनेन विन्दतीत्यायुर्वेदः ऋग्वेदस्योपवेदः, सायुर्वेदश्चासावथर्ववेदः प्रायेणाभिचाराद्यर्थं ऋग्वेदांशः । छान्दोग्याद्युपनिषत्प्रसिद्धश्चतुर्थवेदः पञ्चाशच्छाखात्मकः सायुर्वेदाथर्ववेदः ।

( ३ ) उपास्याकारवितवृत्त्या वृत्तिरूपाणां परिपक्वनिदिध्यासनाख्यायाः श्रवणमननाभ्यासफलभूतायामनुरक्तो भक्तिशब्दोऽत्र ज्ञेयः ।

ख्यापयितुम्, अर्हामि, मया गुरोः सकाशाल्लब्धमेवैतत्प्रकाशितमिति भावः ॥ २ ॥

सार्द्धत्रिकोट्यो नाड्यो हि स्थूलाः सूक्ष्माश्च देहिनाम् ।
नाभिकन्दनिबद्धास्तास्तिर्यगूर्द्धमधःस्थिताः ॥ ३ ॥

देहिनाम जीवानाम् स्थूला; पुष्टावयवाः वण्डुकादयः सूक्ष्माः तन्ववयवा जालधरादयः । सार्द्धत्रिकोट्यः अर्द्धकोट्या युक्तः त्रिकोट्या । नाड्यः शिराः नाडयति, नाड्यते वा नडभ्रंशे चुरादिः अचः इः ङीष् हि, सन्ति इतिशेषः ताः नाड्यः नाभिकन्दे निबद्धाः । नाभौ दृढं बद्धाः अथवा, नाभो कन्दं, मूलं निबद्धं यासां वाः । ताः तिर्य्यग्भावेन, वक्रभावेन, उर्द्धभावेन, अधोभावेन च विशेषस्त्वग्रे द्रष्टव्यः स्थिताः । विन्यस्ता, यथाह–सुश्रुतः

"यावत्यस्तु शिराः काये सम्भवन्ति शरीरिणाम् ।
ताभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः ।
नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता ।
सिराभिरावृता नाभिश्चक्रं ताभिरिवारकैरिति" ॥ १ ॥

द्वासप्ततिसहस्रन्तु तासां स्थूलाः प्रकीर्तिताः ।
देहे धमन्यो धन्यास्ताः पंचेन्द्रियगुणावहाः ॥ ४ ॥

तासाम्—सार्द्धत्रिकोटीनां नाडीनां मध्ये द्वासप्ततिसहस्रं द्व्युत्तरसप्ततिसहस्रसंख्यकाः स्थूलाः पुष्टाः नाड्यः शिरा धमन्यः अहर्निशं तनौ पवनस्य धमनाद्धमनी संज्ञकाः । पंचेन्द्रियाणां चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानाम् गुणान् रूपशब्दगंध, रसस्पर्शान् ॥ आवहन्ति, प्रापयन्ति, पंचेन्द्रियगुणावहाः । ताः

धमनीसंज्ञका नाड्यः—धन्याः श्लाघ्याः प्रधानाइत्यर्थः ॥ ४ ॥

तासांच सूक्ष्मशुषिराणि शतानि सप्त-
स्युस्तानि यैरसकृदन्नरसं वहद्भिः ।
आप्यायते वपुरिदं हि नृणाममीषाम्-
अम्भः स्रवद्भिरिव सिन्धुशतैः समुद्रः ॥ ५ ॥

तासाम्—द्वासप्ततिसहस्राणाम् ॥ मध्ये—तानि सूक्ष्मशुषि राणि अणुमुखानि सप्तशतानि, स्युः—यदाह सुश्रुतः सिरा वर्णनविभक्तिनामकेऽध्याये "सप्तशिराशतानि भवन्ति याभिरिदं शरीरमाराम इव, जलहारिणीभिः, केदारइव च कुल्याभि रुपस्नि ह्यतेऽनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः" इत्यादिना, असकृत् पुनः पुनः अन्नरसं आहाररसं वहद्भिः प्रापयद्भिः यैः सूक्ष्मशुषिरैः अमीषां—नृणाम्, जन्तूनां इदं, वपुः तनुः अम्भः स्रवद्भिः । जलं प्रापयद्भिः । सिन्धुशतैः नदीशतैः समुद्रः अर्णव इव आप्याय्यते प्रपूर्यते, ॥ ५ ॥

आपादतः प्रभृति गात्रमशेषमेषा—
मामस्तकादपि च नाभिपुरः स्थितेन ॥
एतन्मृदंग इव चर्मचयेन नद्धं ।
कायं नृणामिह शिराशतसप्तकेन ॥ ६ ॥

इह, जगति, एषाम् नृणाम् । आपादतः प्रभृति चरणादा रभ्य आमस्तकात्, शिरः पर्यन्तम् । अशेषगात्रम् । सम्पूर्ण शरीरं, व्याप्य इविशेषः, नाभिपुरःस्थितेन, शिरासप्तशतकेन,

सप्तशताशिराभिः एतत्—कायं—देहम् । चर्मचयेन, चर्मगुणेन, मृदङ्ग इव नद्धम्—समन्ततो बद्धम् ॥ ६ ॥

शतसप्तानां मध्ये चतुरधिकाविंशति स्फुटास्तासाम्, एका परीक्षणीया दक्षिणकरचरणविन्यस्ता ॥ ७ ॥

तासाम्—शतसप्तानां मध्ये, सप्तशतनाडीनां मध्ये,—चतुर्विंशतिः शिराः स्फुटाः, विकसिताः ॥ तिष्ठन्ति, यदुक्तं सुश्रुतेन, शारीरस्थाने, "चतुर्विंशतिधमन्यो नाभिप्रभवाः अभिहिताः—तासां तु नाभिप्रभवाणां धमनीनामूर्ध्वगा दश दश चाधोगामिन्यः चतस्रस्तिर्यग्गाः । ऊर्ध्वगाः शब्दस्पर्शरूपरस गंध, प्रश्वासोच्छ्वासजृम्भितक्षुद्धसितकथितरुदितादीन् विशेषानभिवहन्त्यः शरीरं धारयंति, ॥ अधोगतास्तु वातमूत्रपुरीषशुक्रार्त्त वादी. नधो वहंति । तिर्यग्गतानांतुचतसृणांधमनीनामेकै काशतधा सहस्रधाचोत्तरं विभज्यन्ते तास्त्वसंख्यातास्ताभिरिदं शरीरं गवाक्षितं विबद्धमाततंच तासां मुखानि रोमकूपप्रतिबद्धानि इत्यादि" तासां चतुर्विंशतीनां मध्ये, एका, नाडी, एकस्या एव पादादूर्ध्वं गमनात् परीक्षणीया, कीदृशी सा दक्षिणकरचरण विन्यस्ता, दक्षिणहस्तादारभ्य, दक्षिणपादं व्याप्य, विन्यस्ता, प्रसृता, एवमेव, स्त्रिया, वामकरचरणविन्यस्ता बोद्धव्या पुरुषस्य प्राधान्यादत्रदक्षिणशब्दो ज्ञेयः ॥ तदुक्तं "वामे भागेस्त्रिया योज्या, नाडी पुंसस्तु दक्षिणे । इति प्रोक्तो मया देवि सर्वदेहेषु देहिनाम् ,, ननु तर्हि नपुंसकस्य कथं परीक्ष्येत्याशङ्कायामाह, नपुंसकस्य तु स्त्रीपुंसयोरन्यतराकारप्रकटतामपेक्ष्य परीक्षा कार्या, अयमाशयोऽत्र नपुंसके यदा स्त्रिय आकाराधिक्यं स्या

तदा वामहस्तस्य, यदा च पुरुषाकाराधिकता स्यात्तदा दक्षिण करस्था नाडी परीक्षणीयेतिभाव: । साम्यन्तु नस्यादेव कृत्रिमस्य प्रकृतिस्थिता इतिविशेष: ननु कथं स्त्रीपुरुषयोर्वामदक्षिण भेदतो नाडीपरीक्षा क्रियते, अत, आह कूर्मस्थितिभेदाद्वामदक्षिण भेद: । इङ्गलेण्डीयैस्तु वामदक्षिणभेदतो नाड्या: किंचिन्महत्वं मन्यते, तदपि समीचीनं ननु भिषज: चरणनाडीं नं पश्यन्ति अतोऽगम्या सा इतितत्प्रकाशनार्थंप्राचीनानांसदुपदेश: चरणेति वामस्य चरणस्य तु दक्षिणग्रंथिपश्चात्पार्श्वस्था, दक्षिणपादस्य तु, वामग्रन्थिपश्चात्पार्श्वस्थैव परीक्षणीया, करस्था तु वक्ष्यते ॥ ७ ॥

तिर्य्यक्कूर्मो देहिनां नाभिदेशे
वामे वक्त्रं तस्य पुच्छंच याम्ये ।
ऊर्द्धे भागे हस्तपादौ च वामौ
तस्याधस्तात्संस्थितौदक्षिणौ तौ ॥ ८ ॥

देहिनाम् शरीरिणाम् । नाभिदेशे नाभ्याश्रये । तिर्य्यक्कूर्मवक्रभावापन्नव च्छपवदवयवविशिष्टं नाडीचक्रम् । अस्तीति शेष: तस्य कूर्मवदवयवविशिष्टस्य नाडीचक्रस्य । वामे पुरुषस्य वामपार्श्वे वक्त्रम् मुखम् । याम्ये, दक्षिणपार्श्वे, पुच्छम् लांगूलम् । ऊर्द्धे भागे उपरितने भागे, यत्र पुरुषस्य हृदयादिकं भवति ॥ वामौ हस्तपादौ सव्यौ करचरणौ । तस्य कूर्मस्येव नाडीचक्रस्य अधस्तात् गुदवस्त्या-दिनिकटे । दक्षिणौ हस्तपादौ स्याताम् ॥ ८ ॥

वक्त्रेनाडीद्वयं तस्य पुच्छे नाडीद्वयं तथा ।
पंच पंच करे पादे वामदक्षिणभागयो: ॥ ९ ॥

तस्य कूर्मस्य वक्त्रे वामपार्श्वस्थे मुखे । नाडीद्वयम् तथा पुच्छे दक्षिणपार्श्वस्थे लांगूले । नाडीद्वयम् अनया संख्यया सुश्रु त्योक्ताःस्तिर्यग्गाश्चतस्रः सर्वांगगता धमन्यो द्रष्टव्याः। वामदक्षिणभागयोः करे पादे च पंच पंच ज्ञेयाः अर्थात् वामे करे पंच वामे पादे च पंच धमन्यो ज्ञातव्याः तथैव दक्षिणे करे, पादेऽपि पंच पंच ज्ञेयाः अनेनोर्द्ध्वगा दश अधोगाश्च दश धमन्यः प्रदर्शिताः याश्च हृदयमभिप्रपन्ना त्रिधा भूत्वा त्रिंशद्भवन्ति याश्चागपक्षाश्चया न्यरि त्रिधा भूत्वा त्रिंशद्भवन्तीति व्याख्याताः ॥ ९ ॥

## नाडीपरीक्षाप्रकारमाह

सव्येन रोगधृतिकूर्परभागभाजा,
पीड्याथ दक्षिणकरांगुलिकात्रयेण ।
अंगुष्ठमूलमधिपश्चिमभागमध्ये ।
नाडी प्रभञ्जनगतिं सततं परीक्षेत् ॥ १० ॥

अथ वैद्यः दक्षिणकराङ्गुलिकात्रयेण, स्वीयतर्जनीमध्यमानामिकाङ्गुलिभिः अंगुष्ठमूलमधिपश्चिमभागमध्ये, अंगुष्ठमूलमणिबन्धयोर्मध्यस्थले प्रभञ्जनः वातः गतिः यस्या नाड्याः सा प्रभञ्जनगतिस्तां प्रभञ्जनगतिं, नाडीं सततं आरोग्यावस्थायामपिपरीक्षेत् अथवा “ पित्तं पंगुः कफःपंगुः पंगवो मलधातवः वायुना यत्रनीयन्ते तत्र गच्छन्ति मेघवदितिप्रमाण्यात् ” पित्तश्लेष्मणोर्मतत्वभावात् प्रभञ्जनस्य वायोर्मतियत्रेतिव्युत्पत्तिः समीचीना किंकृत्वा सव्येन वामहस्तेन नाडीं धमनीं आपीड्य गृहीत्वा मर्दयित्वा वा अंगुष्ठमूलादारभ्य कूर्परान्तं देशंकिंचिन्मर्दयित्वाथ च, वामक-

रेण कफोणिमधस्तात् गृहीत्वा, दक्षिणकराङ्गुलिकात्रयेण अंगुष्ठमू-
लमणिबन्धयोर्मध्ये नाडीपरीक्षा कार्येतिभावः । कथम्भूतेन सव्येन
रोगधृतिकूर्परभागभाजा । रोगाणां वातादिपिशुनवायूनां धृतिः
धारणं यत्र स एव कूर्परः, कफोणिदेशः भुजमध्यग्रन्थिः ( कोह-
नीतिदेशभाषायांप्रसिद्धा ) तस्य भागं, स्थानं, । भजते इति
रोगधृतिकूर्परभागभाक्तेन भाग इति समुदितकफोणिपरम् । भाजेति
परीक्षाकाले तत्रहस्तस्थितये आपीड्यस्यर्थान्नाडी मेतच्चापीडनं वाता
दिदौर्बल्यपरिबोधनाय अथेतित्यापीडनानन्तरम् । ननु परीक्षाकालेऽप्या-
पीडनस्थिति. दक्षिणेतिप्रायिकं स्वपरीक्षायामन्यथात्वात् ॥ १० ॥

## परीक्षणीयमाह

वातं पित्तं कफं द्वन्द्वं सन्निपातं रसं त्वसृक् ।
साध्यासाध्यविवेकंच सर्वं नाडी प्रकाशयेत् ॥ ११ ॥

नाडी अंगुष्ठमूलस्थाधमनी, वातं, पित्तं, कफं, द्वन्द्वं, द्विदोषं सन्निपातं, त्रिदोषं, रसं, रसधातुं, असृक्, रक्तं, तुशब्दाद्रसरक्त भिन्न मांसमेदोऽस्थिमज्जप्रभृतिपञ्च धातवो बोद्धव्याः साध्यासाध्यविवेकञ्च साध्याऽसाध्यज्ञानम् सर्वं रोगादिकमितिभावः प्रकाशयेत् । ज्ञापयेत् ॥ ११ ॥

## इति नाडीविज्ञाने प्रथमोद्योतः ॥

# अथ नाडीज्ञानसमयमाह.

प्रातः कृतसमाचारः कृताचारपरिग्रहम् ।
सुखासीनः सुखासीनं परीक्षार्थमुपाचरेत् ॥ १२ ॥

कृतः अनुष्ठितः समाचारः—प्रातः कालीनमलोत्सर्गविधिः । येन सः सुखासीनः—सुखोपविष्टः ॥ वैद्य इतिशेषः ॥ कृताचारपरिग्रहं-कृतशौचादिकृत्यम् ॥ सुखासीनं-रोगिणमितिशेषः ॥ प्रातः परीक्षार्थम् उपाचरेत् । प्रातः इतिप्रायिकं मध्याह्ने प्युष्णतान्विता सायाह्ने धावमानाचेतिवचनात् ॥ १२ ॥

# निषिद्धकालमाह.

सद्यस्नातस्य भुक्तस्य क्षुत्तृष्णातपसेविनः ।
व्यायामाक्रांतदेहस्य सम्यङ्नाडी न बुध्यते ॥ १३ ॥

सद्यस्नातस्य तत्क्षणेविहितावगाहनस्य भुक्तस्य कृतभोजनस्य क्षुत्तृष्णातपसेविनः । उपवासपिपासाघर्मसेवकस्य व्यायामाक्रांत देहस्य । परिश्रमाक्रान्तशरीरस्य ॥ नाडी सम्यक् न बुध्यते ज्ञायते ॥ १३ ॥

तैलाभ्यंगे च सुप्ते च तथा च भोजनान्तरे ।
तथा न ज्ञायते नाडी यथादुर्गतमा नदी ॥ १४ ॥

तैलाभ्यङ्गे तैलमर्दने तैल इतिस्नेहमात्रोपलक्षणम् तेन घृत वसादिमर्दनमपिबोध्यम् । सुप्ते निद्राकाले । भोजनांतरे भोजन मध्ये भोजनावसानमात्रे च दुर्गतमा अगाधजलपूर्णानदीव नाडी न ज्ञायते नानुभूयते वातमूर्च्छादिक्षणिकरोगे, नायं विधिः ।

# अथ वातादिस्वभावक्रममाह.

आदौ च वहते वातो मध्ये पित्तं तथैवच ।
अन्ते च वहते श्लेष्मा नाडिकात्रयलक्षणम् ॥ १५ ॥

आदौ कफोणिपीडनद्वितीयक्षणे अर्थाद्यदा वैद्यः कफोणिं गृह्णाति तदपेक्षया द्वितीयेक्षणे वातो वहते तथैव मध्ये वातगत्यपेक्षयाद्वितीयक्षणे पित्तं च अन्तेच वातगत्यपेक्षयातृतीयक्षणे श्लेष्मा कफः वहते चलति इदमेव नाडीकात्रयलक्षणम् । केचिदाहुः आदौ अग्रस्थाने तर्जनीनिवेशस्थाने वातो वहते इत्यादि तन्नामूलकं स्थानभेदस्य कुत्राप्यवक्ष्यमाणत्वात् । तथाच "वाताधिका वहेन्मध्ये त्वग्रे वहति पित्तल । अन्ते च वहते श्ले मा मिश्रिते मिश्रलक्षणा ॥ आदौ च वहते पित्तं मध्ये श्लेष्मा तथैवच । अन्ते प्रभञ्जनो ज्ञेयः सर्वशास्त्रविशारदैः" । एतौ द्वावप्यमूलकौ यतो नास्त्यत्रनाडीस्थानविचारणा यथाचोक्तं तन्त्रांतरे "अत एवं मयाचित्ते सर्वमानीयतत्वतः । कथ्यते नास्ति नास्तीह नाडीस्थानविचारणा ॥ किन्तु नाडीगतिः श्रेष्ठा शास्त्रकारैः प्रकीर्तिता । नच तत्र हि सन्देहो लेशमात्रोऽपि विद्यते तत्प्रकारोप्ययं ज्ञेयः सावधानतया किल । यथासर्पजलौकादिगतिर्वातस्य गद्यते न तत्र कुरुते कोऽपि पित्तश्लेष्मभवं भ्रमम्" महर्षिणामनेन सत्यसिद्धांतेन वाताधिकावहेन्मध्ये इत्यन्नोक्ताः "तृणं पुरःसरं कृत्वा यथा वतो भवेद्वली शेषस्थञ्च तृणं गृह्णन्पृथिव्यां वक्रगो यथा । एवं मध्यगतोवायुः कृत्वापित्तंपुरःसरम् स्वानुगं कफमादाय. नाड्यां वहतिसर्वदा" चेयंयुक्तिः खंडिता, तथाच, अदौचवहतेपित्त मित्यादिमिन् श्लोकेप्रदर्शिता दोषाविष्टपरमेतद्वचन मिति सुदांतसेनोक्ता युक्तिरपि, ॥ १५ ॥

# स्वस्थज्ञानमाह.

भूलतागमनप्राया, स्वच्छास्वास्थ्यमयीशिरा ॥ १६ ॥

भूलता किंचुलकः " केंचुआ ,, इतिभाषायाम्प्रसिद्धः तद्वत् गमनप्राया । प्रायइति वाहुल्येन मसृणवक्रगमनां स्वच्छा। परितः जाड्यरहिता, स्वास्थ्यमयी, सुस्थतासूचिका शिरा भवति केचिद् स्याग्रे " सुस्थितस्य स्थिरा ज्ञेया तथा वलवती मता ,, इति । पठन्ति परं तदुत्तरार्द्धं प्राचीनपुस्तके न दृष्टम् ॥ १६ ॥

प्रातः स्निग्धमयी नाडी मध्यान्हे प्युष्णतान्विता ।
सायान्हेधावमानाच चिराद्रोगविवर्जिता ॥ १७ ॥

चिराद्रोगाविवर्जिता—चिरादिति अतीतानागतयोर्द्वयोर् युक्तिः । अर्थात् यस्य वहुदिनं रोगो ना भूत् वा अधिकदिन मध्ये रोगो न भविष्यति तस्य नाडी धमनी प्रातः स्निग्धमयी प्रभाते स्निग्धा , मध्यान्हेऽपि उष्णातान्विता उष्णतासहिता सायान्हे सन्ध्यायाम् च धावमाना शीघ्रगा भवति ॥ एतच्च पथ्याशिनामेव ॥ १७ ॥

# वातादीनां क्रमेण गतिमाह

वाताद्वक्रगता नाडी चपला पित्तवाहिनी ।
स्थिरा श्लेष्मवती ज्ञेया मिश्रिते मिश्रिता भवेत् ॥ १८ ॥

वक्रेति वायोस्तिर्य्यग्गमनात्तिरोवहन्ती एवं तत्प्रकोपादिना

वातादेर्गतिरपि ज्ञातव्या चपलेति वह्नेरूर्ध्वज्वलनात् ऊर्द्धचंचला स्थिरेति ' जलस्यनीचगमनादनुल्बणा । मिश्रिते मिश्रितचिन्हा भवति ते द्विदोषजे उभयचिन्हा सर्वजे सर्वचिन्हा चपलतास्थिरतयोः समयभेदनाऽविरोधः ॥ १८ ॥

## उक्तवक्रादिसामान्यस्य विशेषमाह

सर्पजलौकादिगतिं वदन्ति विबुधाः प्रभञ्जनान्नाडीम् ।
पित्तेन काकलावकभेकादिगतिं विदुः सुधियः ॥ १९ ॥

विबुधाः पण्डिताः प्रभञ्जनात् कुपितवातात् सर्पजलौकादिगतिं नाडीं वदन्ति कथयन्ति । जलं ओकः स्थानं यस्याः सा "जोंक" इतिनाम्ना प्रसिद्धा आदिना वाते वृश्चिकादिगतिर्दोलायिता पित्तेन कुपितपित्तेन काक लावकभेकादिगतिं सुधियः प्राज्ञा विदुः लावकः लवा इतिनाम्ना प्रसिद्धः । अस्य प्रभेदो यथा " लावाविष्किरवर्गस्युस्ते चतुर्द्धा मता बुधैः पांशुलो गौरकोऽन्योऽस्ति पौंड्रको दर्भकस्तथा" ॥ पौंड्रकः किञ्चिद्रक्तः आदिशब्देन पिच्छ कलिङ्ग कलविङ्कादिगतिः ॥ १९ ॥

राजहंसमयूराणां पारावतकपोतयोः ।
कुक्कुटादिगतिं धत्ते धमनी कफसंवृता ॥ २० ॥

कफसंवृता धमनी, कुपितकफयुक्ता नाडी राजहंसः कलहंसः हंसानां राजा राजदन्तादि यथा च " चरणैश्चञ्चुसहितैर्लोहिता ये स्वयं सिताः । ते राजहंसा विख्याता इत्याहुः कोषकोविदाः" अनुमानेन सारस, इतिनाम्ना प्रसिद्धः मयूरः तेषाम् । पारावतः

कपोतपक्षी कपोतः घुघुती, पिंडुकिया, इति प्रसिद्धश्चित्रकण्ठविहङ्गमः तयोः । कुक्कुटः ताम्रचूडः । मुरगा, इतिप्रसिद्धः तदादिगतिं धत्ते यथाऽभीपाक्षिगश्चलन्ति तथा कुपितकफयुक्ता नाड़ी चलतीतिभावः ॥ आदिशब्देन गजवराङ्गनादिगतिरनुसरणीया ।२० ।

## द्वन्दजस्यापि क्रमेणैवं भेदानाह

मुहुः सर्पगतिं नाडीं मुहुर्भेकगतिं तथा ।
वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः ॥ २१ ॥

भेकः मण्डूकः यस्य प्लुतगतिर्भवत्यन्यत्सुवचम् ॥ २१ ॥

भुजगादिगतिं नाडीं राजहंसगतिं तथा ।
वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः ॥ २२ ॥

भुजगादीनां गतिरिवगतिर्यस्यास्तामिति ॥ २२ ॥

मण्डूकादिगतिं नाडीं मयूरादिगतिं तथा ।
पित्तश्लेष्मसमुद्भूतां प्रवदन्ति महाधियः ॥ २३ ॥

महाधियः पण्डिताः पित्तश्लेष्मसमुद्भूताम् । पित्तकफजातामित्यर्थः ॥ अत्राप्यादिशब्देन वृश्चिकादिगतिरन्वेषणीया । नूतनपुस्तकेषु मण्डूकादिगतिमित्यस्यश्लोकस्याग्रेऽयंश्लोकः । सूक्ष्मा "शीता स्थिरा नाडी पित्तश्लेष्मसमुद्भवा कफवातोद्भवा नाडी सर्पहंसगतिर्भवेत्" दृश्यते, अस्यायमर्थः अनुतरसूक्ष्मता, न तु पित्तधर्मः तथाप्यत्र विकृतिविषमसमवायावस्थत्वात् कस्य चित्संयोगादिविशेषस्य विचित्रं कार्यं भवति, यथा हरिद्राचूर्णयोर्लौहित्यम् अथवा

पित्तश्लेष्मणोर्द्रवत्वात्सूक्ष्मत्वं शीततास्थिरत्वे कफस्य कार्ये ।२३।

## त्रिदोषजामप्याह

उरगादिलावकादिहंसादीनाञ्च बिभ्रती गमनम् ।
वातादीनाञ्च समं धमनी सम्बन्धमाधत्ते ॥ २४ ॥

उरगादीनां लावकादीनां हंसादीनां गमनं बिभ्रती: संनिपाते धमनीतिशेषः । वातादीनांच समं अन्यूनानतिरेकं अर्थात् आदौ उरगादिवन्मध्ये लावकादिवत् अन्ते हंसादिवच्चलति सम्बन्धं आधत्ते यथा वातपित्तकफानां नाड्यः क्रमशश्चलन्ति तथा चलेत्तिर्हिसुखसाध्यत्वं पित्ताक्रमतया कृच्छ्रसाध्यत्वमसाध्यत्वञ्च यदादौ पित्तगतिः । मध्ये वायुगतिः अन्ते श्लेष्मगतिरितिविपरीतक्रमेण चलति तदाकृच्छ्रसाध्यत्वमसाध्यत्वञ्चेतिभावः ॥ २४ ॥

लावतित्तिरिवार्ताकगमनं सन्निपाततः ।
कदाचिन्मन्दगा नाडी कदाचिच्छीघ्रगा भवेत् ॥
त्रिदोषप्रभवे रोगे विज्ञेया साभिषग्वरैः ॥ २५ ॥

सन्निपाततः त्रिदोषात् नाडी लावतित्तिरिवार्ताकगमनं धत्ते इतिशेषः लावः लवा इतिप्रसिद्धः । तित्तिरिः तीतर इतिभाषाप्रसिद्धः " तित्तिरिः कृष्णवर्णः स्यात्सतुगौरः कपिञ्जलः" इतिकोशः तित्ति इतिशब्दं रौति रुधातोर्बाहुलकात्किः । वार्ताकःवटर इतिभाषा प्रसिद्धः वा नाडीकदाचिन्मन्दगा अशीघ्रगा कदाचित् क्षणकालानन्तरम् । शीघ्रगा त्वरितगमनवती भवेत् जायेत सा

नाडी भिषग्वरै वैद्यवर्यैः त्रिदोषप्रभवे रोगे सन्निपाते विज्ञेया ज्ञातव्या ॥ २५ ॥

## सन्निपातेसामान्यतःसुखसाध्यत्वमाह

यदा यं धातुमाप्नोति तदा नाडी तथागतिः ।
तथाहि सुखसाध्यत्वं नाडीज्ञानेन बुध्यते ॥ २६ ॥

नाडी धमनी यदा यस्मिन्काले यं धातुं रसरक्तादिकम् । आप्नोति प्राप्नोति तदा तस्मिन्काले तथागतिः स्यात् तथाहि सुख साध्यत्वं नाडीज्ञानेन बुध्यते ज्ञायते । अयमर्थः अपराह्णादौ नाडी वातोल्बणा प्रथमं वातगत्येव वहति ततो यथायथं पित्तादिगत्या ततः सुखसाध्यत्वं व्यतिरेकेण व्यतिरेकः । तदुक्तमन्यैः नाडी यथाकालगतिस्त्रयाणां प्रकोपशान्त्यादिभिरेव भूयः ॥ २६ ॥

## अथ सन्निपातस्यासाध्यलक्षणमाह.

मन्दं मन्दं शिथिलशिथिलं व्याकुलं व्याकुलं वा ।
स्थित्वा स्थित्वा वहति धमनी याति नाशञ्च सूक्ष्मा ॥
नित्यं स्थानात् स्खलति पुनरप्यंगुलीः संस्पृशेद्वा ।
भावैरेवं बहुविधविधैः सन्निपातादसाध्या ॥ २७ ॥

सन्निपातात् धमनी नाडी मन्दं मन्दं । मुहुरनुद्भटमप्रखर- मितियावत् । शिथिलशिथिलं स्खलद्गतिम् । व्याकुलं व्याकुलं अस्तव्यस्ततः वा समुच्चये यथास्यात्तथा स्थित्वास्थित्वा स्थित्वा-

स्थित्वेत्यावृत्त्या च तद्रूपैवगतिः हित्वाहित्वेतिभावः वहति चलति च नाशं अदर्शनम् याति प्राप्नोति सूक्ष्मा सुदुर्बला सती यदि लभ्यते तदा अनित्यं प्रायः स्थानात् अंगुष्ठमूलतः स्खलति कदापि तत्र न स्पन्दते इत्यर्थः तदुक्तं "हन्ति च स्थान विच्युतेति" पुनरपि कियद्विलम्बेन अंगुली वा संस्पृशेत् । किंचित्स्फुरेत् । एवं इत्येवंरूपैः बहुविधविधैः अनेक भावैः धर्मैः सन्निपातात् असाध्या साधयितुमशक्येत्यर्थः ॥ २७ ॥

## निम्नलिखितश्लोकाः मूलपुस्तके न सन्ति.

महातापेऽपि शीतत्वं शीतत्वे तापिता शिरा ।
नानाविधगतिर्यस्य तस्य मृत्युर्न संशयः ॥
त्रिदोषेस्पन्दते नाडी मृत्युकालेऽपि निश्चला ॥२८॥

यस्य देहिनः । महातापेऽपि शरीरेबृहति सन्तापेऽसत्यपि महातापशब्देन आशयाकृष्टपित्तादितापनिरासः । शीतत्वे इत्यत्रापि महति संबध्यते शरीरस्य महाशीतत्वे अतिशीतलतायुक्तत्वे शिरा नाडी तापिता स्यादितिशेषः तस्य रुग्णस्य मृत्युः न संशयः । अवश्यं मृत्युरित्यर्थः । कीदृशी शिरा नानाविधगतिः वाताद्यनेक गतिमती त्रिदोषे सन्निपाते अपिशब्दश्चार्थोऽत्र मृत्युकाले च मरणसमये नाडी निश्चला सती स्पन्दते स्फुरति ॥ २८ ॥

पूर्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्माणमाबिभ्रतीम् ।
सन्तानभ्रमणं मुहुर्विदधतीं चक्राधिरूढामिव ॥

तीव्रत्वं दधतीं कलापिगतिकां सूक्ष्मत्वमातन्वतीम् ।
नोऽसाध्यां धमनीं वदन्ति सुधियो नाडीगतिज्ञानिनः २९

नाडीगतिज्ञानिनः । नाडीज्ञानकुशला: सुधियः पण्डिताः । पूर्वं प्रथमं पित्तगतिं तदनु प्रभञ्जनगतिं वातगतिं तदनन्तरं श्लेष्माणं कफं आविभ्रतीम् मुहुः वारम्वारम् चक्राधिरूढामिव चक्रोपरि भ्राम्य माणामिव सन्तानभ्रमणं सन्तानेन विस्तारेण भ्रमणं विदधतींकुर्वतीं तीव्रत्वं अतिशयवेगम् दधतीं एवञ्च कदाचित् कलापिगतिकां कलापी मयूरस्तद्वद्गमनाम् । सूक्ष्मत्वं कृशतामित्यर्थः । आतन्वतीम् आपादयन्तीं धमनीं नाडीं नो न साध्यां वदन्ति असाध्यां कथयन्तीतिभावः ॥ २९ ॥

Indira Gandhi National Centre for the Arts

## तथाचान्यत्र

यात्युच्चा च स्थिरात्यन्ता याचेयं मांसवाहिनी ।
या च सूक्ष्मा च वक्राच तामसाध्यां विदुर्बुधाः ३० ॥

या नाडी अत्युच्चा अत्युच्चगतिः सहजतोऽप्युच्चतरेत्यर्थः अत्यन्ता स्थिरा ध्यानेनैवज्ञायमानगतिः मांसवाहिनी लगुडाकृतिः मांसाहारे यादृशी नाडीगतिर्भवतितादृशी । सूक्ष्मा च वक्रा च पुष्पमिव वाह्यान्तरमिति बुधाः तामसाध्यां विदुः ॥ ३० ॥

## असाध्यत्वापवादमाह

भारमवाहमूर्च्छाभयशोकप्रमुखकारणान्नाडी ।
सम्मूर्च्छितापि गाढं पुनरपि सा जीवितं धत्ते ॥ ३१ ॥

भार: गुरुभारोद्वहनम् । प्रवाह: अविच्छेदेन रक्तादिप्रवृत्ति: मूर्च्छा मोह: "क्षीणस्य बहुदोषस्य विरुद्धाहारसेविन: वेगाघाता च्चाभिघाताद्धीनसत्वस्य वा पुन: ॥ करणायतनेषूग्रा बाल्ये च भ्यन्तरेषु च निविषन्ते यदादोषास्तदा मूर्च्छन्ति मानवा" इत्यादिनोक्ता भय: व्याघ्रादिदर्शनाधीनाचित्तवृत्तिविशेष: । तल्लक्षणं यथा, "रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम्" शोक: इष्टवियोगनिमित्तको मनस: संताप: एते प्रमुखा आदयो यस्य तत्कारणं तस्मात् नाड़ी धमनी, गाढम् अतिमात्रं, संमूर्च्छिता अपि अतिनिस्पन्दापि पुनरपि, जीवितं धत्ते, साध्यतां यातीत्यर्थ: ॥ ३१ ॥

## तदुक्तम्

पतित: सन्धितो भेदी नष्टशुक्रश्च यो भवेत् ।
शाम्यते विस्मयस्तस्य न किञ्चिन्मृत्युकारणम् ॥ ३२ ॥

पतित: वृक्षादित: सन्धित: अस्थ्यादिसन्धानेनसंहित: भेदी, अतिसारी, च य: नष्टशुक्र: राजयक्ष्मणा, क्षयेण वा वीर्यक्षययुक्त: भवेत् तस्य विस्मय: असाध्यत्वस्य संदेह: ॥ शाम्यते नावतरति, न किञ्चिन्मृत्युकारणं, मृत्युकारणं न स्यादित्यर्थ: ॥ ३२ ॥

## अन्यत्रापि

तथा भूताभिषङ्गेऽपि त्रिदोषवदुपस्थिता ।
समांगा वहते नाडी तथा च न क्रमं गता ॥
अपमृत्युर्नरोगांगा नाडी तत्सन्निपातवत् ॥ ३३ ॥

भूताभिषङ्गे तथा भूतसामान्याभिषङ्गे देवजुष्टादौ यस्य नाडी त्रिदोषवत् सन्निपातवत् उपस्थिता, तद्वद्गमना, एवभवति न तु तत्फलप्रदा, अङ्गनसमा, समांगा वातपित्तकफस्वभावक्रमवती, तथाचेति नक्रमं गता, क्रमं व्यतिक्रमं न गतेत्यर्थः तस्मादेव । अपमृत्युः अपगतो मृत्युः यस्याः सा नाडी सन्निपातवत् रोगांगा न परमार्थतः सन्निपातवदपि सन्निपातजन्या न स्यात् ॥ ३३ ॥

## तदुक्तम्

स्वस्थानहीने शोके च हिमाक्रान्ते च निर्गदाः ।
भवन्ति निश्चला नाड्यो न किंचित्तत्र दूषणम् ॥ ३४॥

Centre for the Arts

स्वस्थानहीने उच्चस्थानादितः पतनादंगुष्ठमूलतश्चलने, शोके पुत्रदारधनादिविरहे हिमाक्रान्ते शीतव्याप्ते अङ्गानामिति शेषः निर्गदा अपि अरोगा नाड्योनिश्चला भवन्ति, तत्र स्वस्थानहीनादिसत्वेऽपि किंचित्, कथमपि, दूषणम् असाध्यत्वभ्रमो न ॥ ३४ ॥

स्तोकं वातकफं दुष्टं पित्तं वहति दारुणम् ।
पित्तस्थानं विजानीयाद् भेषजं तस्य कारयेत् ॥ ३५॥

यदा नाडी वातकफं स्तोकं अल्पं वहति वातकफाभ्यां नाडी किंचिद्वहति इतिभावः दुष्टं, क्षीणत्वाऽधिकत्वाभ्यामपि विशेषादुल्वणं, पित्तं, दारुणं विषमवेगेन वहति तदा पित्तस्थानं, पित्तस्य स्थितिं विजानीयात् बुध्येत तस्य रोगिणः भेषजं औषधं कारयेत् तदा तत्प्रतीकारार्थं भेषजं कुर्य्यात् असाध्यता न स्यादितिभावत् ॥ ३५॥

स्वस्थानाच्चवनं यावत् धमन्या नोपजायते ।
तावच्चिकित्सा सत्वेऽपि नासाध्यमिति हि स्थितिः ३६

यावत् धमन्या: स्वस्थानात् अंगुष्ठमूलात् च्यवनं पृथक्त्वं, न स्यात् न भवेत् तावत् चिकित्सासत्वेऽपि रोगकारणे सत्यपि यथा " आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता, सूतप्रधाना,दैवीस्याच्छेदभेदात्मिकासुरी ॥ मानुषी षड्रसा ज्ञेया जपहोमादिसँस्कृता कलौ चाल्पबले लोके मानुषी तत्र पूजिता " तस्य लक्षणं यथा, " याभिः क्रियाभिः जायन्ते शरीरे धातवः समाः सा चिकित्सा विकाराणां कर्म तद्भिषजां मतम् " हि तथाहि न असाध्यं, इतिस्थिति: मन्यते, तच्चप्रामाणिकं वहुधाऽव्यभिचारदर्शनात् हन्ति च स्थानविच्युतेत्यत्र, चकारस्य योगव्यवच्छेदकत्वमितिभाव: ॥ ३६ ॥

## प्रसङ्गात्कालनिर्णयमाह.

भूलता भुजगाकारा नाडी देहस्य संक्रमात् ।
विशीर्णा क्षीणतां याति मासान्ते मरणं भवेत् ॥३७॥

यस्य नाडी भूलता किंचुलुकः केंचुआख्यकीट विशेषः तदाकारा कदाचिन्महीलतावत्कृशा तद्गतिवदतिमसृणवक्रगमना च भुजगः सर्पः तदाकारा कदाचित्सर्पवत्परिपुष्टा तद्गतिवद्दुलवत्तर वक्रगमना च विशीर्णा अलक्ष्यतामापन्ना सती क्षीणतां अतिकृशतां याति प्राप्नोति तर्हि देहस्य संक्रमात्देहक्रममपेक्ष्य तेन देहोऽपि यदा स्थूलः शोथादिना कदाचिच्चकृशः स्यात्तदा, मासांते द्वितीये मासि मरणं पंचत्वं भवेत् म्रियतइतिभावः ३७

## तथा

क्षणाद्गच्छति वेगेन शांततां लभते क्षणात् ।
सप्ताहान्मरणं तस्य यद्यङ्गं शोथवर्जितम् ॥ ३८ ॥

यस्य नाड़ी क्षणात् इतिद्रुतं न तु कदाचित् वेगेन जवेन गच्छति वहति क्षणात् सत्वरं शान्तताम् अनुपलभ्यत्वं लभेत यदि अङ्गं शरीरं शोथवर्जितं स्यात् तस्य सप्ताहात् सप्ताहानन्तरं अष्टमे दिने मरणं भवेत् ॥ ३८ ॥

## तथा

हिमवद्विशदा नाडी ज्वरदाहेन तापिनाम् ।
त्रिदोषस्पर्शभजतां तदा मृत्युर्दिनत्रयात् ॥ ३९ ॥

यदा, ज्वरदाहेन, तापिनां ज्वरस्य तापेन संतप्तगात्राणाम् त्रिदोषस्पर्शभजतां सन्निपातलक्षणजुषां हिमवद्विशदा, तुषारवद् व्यक्ता, नाडी स्यात् तदा, दिनत्रयात् त्रिदिनानन्तरं चतुर्थे दिवसे मृत्युः भूयात् ॥ ३९ ॥

## तदा

निरीक्ष्या दक्षिणे पादे तथा चैषा विशेषतः ।
मुखे नाडी वहन्नित्यं ततस्तु दिनतुर्यकम् ॥ ४० ॥

दक्षिणे पादे, दक्षिण इतिपुंसः स्त्रियास्तु वामे एव तथा एषा करस्थैव, यतः करस्था नाडी पादपर्य्यंतव्यापिनी, विशेषतः

विशेषज्ञानार्थं निरीक्ष्या, परीक्षणीया, यदि च नाडी उभयनाड्यपि करस्था पादस्थाचेत्यर्थः मुखे पुरोभागे तर्जनीनिवेशस्थले, नित्यं सदा। वहेत् ततस्तु दिनतुर्य्यकं तदा तु दिनचतुष्टयंव्याप्य, नरः जीवतीतिशेषः ॥ ४० ॥

गतिं भ्रमरकस्येव वहेदेकदिनेन तु ॥
कन्दे न स्पन्दते नित्यं पुनर्लगतिचांगुलौ ।
मध्येद्वादशयामानां मृत्युर्भवतिनिश्चितम् ॥ ४१ ॥

यदि नाडी भ्रमरकस्यं मधुपस्य गतिमिव परिभ्रमणरूपं गमनमिव यथा भ्रमरइतस्ततो गत्वा त्यक्तप्रदेशं श्रयते तद्वदित्यर्थः वहेत् चलेत् तदा एकदिनेन मृत्युर्भवति ॥ कन्दे नाडीमुखे स्पन्दनस्थाने न स्पन्दते कदाचिन्न स्पन्दतेस्वल्पं स्पन्दते इतिसम्भाव्यते नित्यं प्रायः पुनश्चांगुलौ तन्मूले कदाचिलगति तदा द्वादशयामानां मध्ये द्वादशप्रहरमध्ये निश्चितं ध्रुवं मृत्युः भवति ॥ ४१ ॥

स्थित्वा नाडी मुखे यस्य विद्युद्द्योत इवेक्ष्यते ।
दिनैकं जीवितं तस्य द्वितीये म्रियते ध्रुवम् ॥ ४२ ॥

यस्य नाडी धमनी स्थित्वा मुखे अंगुष्ठमूले विद्युद्द्योत इव विद्युतः सौदामिन्याः द्योतः इवप्रकाश इव ईक्ष्यते दृश्यते तस्य जीवितं प्राणः दिनैकं एकदिनं व्याप्य तिष्ठति द्वितीये अष्टप्रहरादूर्द्ध्वं ध्रुवं निश्चितं म्रियते पंचत्वं यास्यतीत्यर्थः ॥ ४२ ॥

स्वस्थानविच्युता नाडी यदा वहति वा न वा ।
ज्वाला च हृदये तीव्रा तदा ज्वालावधि स्थितिः ४३ ॥

यस्य रोगिणो नाडी स्वस्थानात् अंगुष्ठमूलात् विच्युता विस्रंसिता सती वहति चलति वा न वहति च हृदये उरसि तीव्रा दुःसहा ज्वाला दाहश्चेत्तदा ज्वालावधि ज्वालापर्य्यन्तं स्थितिः जीवनस्य मर्य्यादेत्यर्थः ॥ ४३ ॥

SANS
615.536
KAN

अंगुष्ठमूलतो बाह्ये द्व्यंगुले यदि नाडिका ।
प्रहरार्द्धात् बहिर्मृत्यु जानीयाच्च विचक्षणः ॥ ४४ ॥

अंगुष्ठमूलतः अंगौ पाणौ तिष्ठति अंगुष्ठः वृद्धांगुलिस्तस्य मूलतः बाह्ये, बहिर्भवे, द्व्यंगुले मध्यमानामिकयोरधः यदि नाडिका वहति, चलति तदा विचक्षणः विद्वान् प्रहरार्द्धाद्बहिः अर्द्ध-प्रहरानन्तरम् मृत्युं जानीयात् ॥ ४४ ॥

द्व्यंगुलाद्बाह्यतो नाडी मध्ये रेखा वहेद्यदि ।
सार्द्धप्रहरकान्मृत्यु जायते नात्र संशयः ॥ ४५ ॥

द्व्यङ्गुलात् तर्जन्याः मध्यमायाश्च, बाह्यतः यदि मध्ये, अनामिकायामध्ये रेखा अल्पा, नाडी धमनी, वहेत् तदा, सार्द्ध प्रहरकात् अर्द्धप्रहरेण सह वर्त्तमानात्प्रहरात् मृत्युः आत्मशरीरे न्द्रियवियोगः जायते, अत्र संशयः न, ॥ ४९ ॥

मध्ये रेखासमा नाडी यदा तिष्ठति निश्चला ।
षड्भिश्च प्रहरैस्तस्य ज्ञेयो मृत्युर्विचक्षणैः ॥ ४६ ॥

यदा मध्ये, मध्यमायाः निवेशस्थाने रेखा अल्पा सूक्ष्मेति-यावत् समा, ऊर्द्धवांधो गतिरहिता, नाडी धमनी निश्चला स्यन्द-

IGNCA RAR
ACC. No. R-320

रहिता सती, तिष्ठति विचक्षणैः प्राज्ञैः षड्भिः प्रहरैः षट्प्रहरान न्तरं मृत्युः ज्ञेयः ॥ ४६ ॥

पादांगुलगता नाडी चञ्चला यदि तिष्ठति ।
त्रिभिस्तुदिवसैस्तस्य मृत्युरेव न संशयः ॥ ४७ ॥

पादाङ्गुलगता, पादाङ्गुलपर्य्यन्तंव्याप्ता नाड़ी, यदि चञ्चला, सती विद्युत् द्योतिरिव, तिष्ठति तस्य त्रिभिः दिवसैः चतुर्थेदिने मृत्युः एव संशयो न ॥ ४७ ॥

पादांगुलगतानाडी कोष्णा वेगवती भवेत् ।
चतुर्भिर्दिवसैस्तस्य मृत्युरेव न संशयः ॥
पादांगुलगता नाडी मन्दमन्दा यदा भवेत् ।
पञ्चभिर्दिवसैस्तस्य मृत्युर्भवति नान्यथा ॥ ४८ ॥

कोष्णा किञ्चिदुष्णा चतुर्भिर्दिवसैः दिनचतुष्टयानन्तरम् मन्दमन्दा, अतिशिथिला, पञ्चभिर्दिवसैः पञ्चदिनानन्तरम् अन्यत्सुवचम् ॥ ४८ ॥

एवं संख्यादिभेदेन नाडीज्ञेया विचक्षणैः ।
स्वर्गेऽपि दुर्लभा विद्या गोपनीया प्रयत्नतः ॥ ४९ ॥

यतः नाड़ी ज्ञानविद्यास्वर्गेऽपि दुर्लभा अतः प्रयत्नतः पौरुषात् गोपनीया, सर्वत्र सच्छिष्यादिषु शिक्षा करणेन सुरक्षणीया अन्यथेयमप्यशिक्षाकरणान्नष्टा भविष्यति ॥ ४९ ॥

## इति नाडीविज्ञाने द्वितीयोद्योतः ॥

# अथ रोगेषु निरूपणीयेषु प्रधानतया प्रथमं ज्वरनिरूपण माह.

## तत्र ज्वरपूर्वरूपे

अंगग्रहेण नाडीनां भवन्ति मन्थराः प्लवाः ।
पुनः प्रबलतां याति ज्वरदाहोऽभिभूतये ॥
सान्निपातिकरूपेण भवन्ति सर्ववेदनाः ॥ ५० ॥

अङ्गग्रहेण, गात्रवेदनया ज्वरपूर्वरूपेणेत्यर्थः नाडीनां मन्थरा, मन्दा, प्लवाः उत्प्लुतगतयः भवन्ति, पुनः नाड्याः भेकादिवद्गमनं, प्रबलतां, अधिकत्वं, याति प्राप्नोति, कस्मै प्रयोजनाय, ज्वरात् दाहस्तापस्तस्याभिवृद्धये वृद्ध्यर्थं अङ्गग्रहेणेति सामान्याङ्गग्रहसूचकं पुनः प्रबलतामितिविशेषांगग्रहस्य पिशुनमिति लक्षणद्वयं, सान्निपातिकरूपेण, सन्निपातरूपत्वहनेनेव सर्ववेदना नानाकष्टाः भवन्ति, ॥ ५० ॥

### ज्वररूपमाह ॥

ज्वरकोपे च धमनी सोष्णा वेगवती मता ॥ ५१ ॥

ज्वरकोपे धमनी नाड़ी सोष्णा, उष्णेन सह वर्तमाना, वेगवती शीघ्रगमना मता कथिता, यत उक्तमपि "उष्मापिताहते नास्ति ज्वरो नास्त्युष्मणा विना ॥ उष्णा वेगधरा, नाडी ज्वरकोपे प्रजायते" ॥ ५१ ॥

## अन्यत्र च

ज्वरे वक्रं प्रधावन्ति तथा च मारुतप्लुवे ।
रमणांते निशि प्रातस्तथादीपशिखा यथा ॥ ५२ ॥

नाड्यः ज्वरे वक्रं सर्पादिगमनं यथास्यात्तथा प्रधावन्ति, शीघ्रगमना भवंति, मारुतप्लुवे च म्रियन्ते जना अनेनवृद्धनासौ मारुतो वायुस्तस्य प्लुवे, उद्रेके वृद्धौ, तथा पूर्ववत् धावन्ति, निशि रात्रौ रमणान्ते नैशिकरमणानन्तरम् प्रातः प्रभाते तथा पूर्ववत् प्रधावन्ति, यथा दीपाशिखा, इतस्ततो मन्दाचलंति ॥ ५२ ॥

## तत्रापि विशेषमाह

Indira Gandhi National

सौम्या सूक्ष्मा स्थिरा मन्दा नाडी सहजवातजा ।
स्थूला च कठिना शीघ्रा स्पन्दते तीव्र मारुते ॥५३॥

सौम्या, अनुग्रा, सूक्ष्मा, स्तोका, स्थिरा, चिरादवोपलभ्यमानस्पन्दा, मन्दा, अनुद्भटा नाड़ी सहजवातजा, स्वाभाविकवातजा स्थूला अकृशा कठिना काष्ठवत्दृढा शीघ्रा शीघ्रगमना तीव्रमारुते अधिकवायो स्पन्दते, स्फुरति ॥ ५३ ॥

## तत्र वातज्वरे

वक्रा च चपला शीतस्पर्शा वातज्वरे भवेत् ॥

वातज्वरे वक्रा जलौकासर्पादिगतितुल्या चपला शीघ्रा शीतस्पर्शा शीतस्पर्शवती नाडी भवेत् ॥

## पित्तज्वर

भृता च सरला दीर्घा शीघ्रा पित्तज्वरे भवेत् ।

शीघ्रमाहननं नाड्याः काठिन्याच्च चला तथा ॥५४॥

पित्तज्वरे पैत्तिके ज्वरे नाडी भृता पुष्टा सरला अवक्रा दीर्घा अंगुलीत्रयस्थानव्यापिनी शीघ्रा वेगवती भवेत् केचिदेत-च्छ्लोकार्द्धं पित्तसञ्चयदशायां योजयन्ति उत्तरार्द्धं च पित्तकोप दशायां तन्न समीचीनं काठिन्यशब्दस्य पित्तप्रकोप इत्यर्थोन भवितुमर्हति अतः काठिन्यात् कठोरतया नाड्याः शीघ्रं द्रुतं आहननं भवति तथा चला चंचला भवति ।

Indira Gandhi National

मलाजीर्णेन नितरां स्पन्दनञ्च प्रकीर्तितम् ॥ ५५ ॥

मलाजीर्णे पित्तज्वरे दोषाजीर्णसम्बन्धे सति नाड्याः नितरां सुतरां स्पन्दनं गमनं न प्रकीर्तितम् । मलाजीर्णस्य स्तब्धत्वेन नैसर्गिकपित्तज्वरगमनात्किञ्चिन्न्यूनगमनेतिभावः ॥ ५५ ॥

## कफज्वरे

नाडी तन्तुसमा मन्दा शीतला श्लेष्मदोषजा ॥

श्लेष्मदोषजा कफज्वरजा नाडी तन्तुसमा अतिसूक्ष्मा मन्दा हंसपारावतादिगतिवत् अलसगतिः । शीतला शीतस्पर्शा तन्तोद-कसिक्तरज्जुवदित्येके ।

### वातपित्तज्वरे

चञ्चला तरला स्थूला कठिना वातपित्तजा ॥ ५६ ॥

चञ्चला चपला तरला सरला स्थूला भृता परिपुष्टा कठिना स्तब्धा वातपित्तदोषजन्येतिभावः ॥ ५६ ॥

### वातकफज्वरे

ईषच्च दृश्यते तूष्णा मन्दा स्यात् श्लेष्मवातजा ॥

ईषत् किंचित् उष्णा उष्णस्पर्शा ईषदुष्णानाडीत्यर्थः अयमपि वातधर्मः दृश्यते तथा मन्दा हंसपारावतगमना कफधर्मोऽयं श्लेष्मवातजा कफवातज्वरजन्येत्यर्थः ।

## न्यूनकफेऽधिकवाते द्वन्द्वज्वरे

निरन्तरं खरं रूक्षं मन्दश्लेष्माभिवातला ॥ ५७ ॥

मन्दः किंचिन्मात्रम् श्लेष्मा कफःअतिवातः अधिकवातः तं लाति गृह्णाति मन्दश्लेष्मातिवातला नाडी निरन्तरम् सततम् धारावाहिरूपं मध्येऽन्यगतिरहितं खरं तीक्ष्णं मांसशून्यं रूक्षं अचिक्कणम् यथातथा वहति ॥ ५७ ॥

रूक्षवातभवे तस्य नाडी स्यात्पित्तसन्निभा—

तस्य रोगिणः नाडी रूक्षः अस्निग्धः कफरहितः वातस्तद्भवे

श्लेष्मविनिर्मुक्ते वातभवे ज्वरे पित्तसन्निभा कुलिङ्गकाकमण्डूक-गतितुल्या स्यात् ॥

## पित्तश्लेष्मज्वरे ॥

सूक्ष्मा शीता स्थिरा नाडी पित्तश्लेष्मसमुद्भवा ५८ ॥

पित्तश्लेष्मसमुद्भवा नाडी सूक्ष्मा कृशा तन्तुवत्सूक्ष्मेतियावत् शीता अल्पशीता केवलकफाद्भेदः स्थिरा विश्रान्तजवा भवति तल्लक्षणं यथा विप्रतिकास्यतातन्द्रा मोहः कासो रुचिस्तृषा मुहुर्दाहो मुहुःशीतं पित्तश्लेष्मज्वराकृतिः ॥ ५८ ॥

Indira Gandhi National Centre for the Arts

## प्रसंगाद्रुधिरकोपजां नाडीमाह

मध्ये करे वहेन्नाडी यदि सन्तापिता ध्रुवम् ।
तदा नूनं मनुष्यस्य रुधिरा पूरिता मलाः ॥ ५९ ॥

यदि नाडी मध्ये करे अंगुष्ठमूले ध्रुवं सन्ततम् सन्तापिता वहेत् तदा नूनं निश्चितं मनुष्यस्य मला मलनीकरणान्मलाः वातादिदोषाः । रुधिरेण दुष्टरक्तेन आपूरिता सम्यक्पूरिता ज्ञेया । केचिन्मध्ये करे कफोणिदेश इतिब्रुवते ॥ ५९ ॥

## आगन्तुक ज्वररूपभेदमाह ॥

भूतज्वरे सेक इवातिवेगात् ।
धावन्ति नाड्योऽहि यथाऽहिगानाम् ॥

भूतज्वरे देवासुरगन्धर्वयक्षरक्षःपितृपिशाच नागग्रहजे भूताभिषंगादुद्वेगो हास्यरोदनकम्पनम् इत्यादिनोक्ते नाड्यो हि अतिवेगात् अतिजवेन अविवेगानाम् समुद्रगानां नदीनां सेकः प्रवाह इव धावन्ति चलन्ति ।

## यथा

एकाहिकेन क्वचन प्रदूरे-
क्षणान्तगामा विषमज्वरेण ।
द्वितीयके वाथ तृतीय तुर्ये-
गच्छन्ति तप्ता भ्रमिवत् क्रमेण ॥ ६० ॥

एकाहिकेन विषमज्वरेण क्वचन प्रदूरे मध्यमानामिकयोर्निवेशस्थाने नाड्यः क्षणान्तगामा भवन्ति क्षणं क्षणं व्याप्य वहन्ति अथ द्वितीयके अन्येद्युनाम्नि वा तृतीयतुर्ये तृतीयके चतुर्थके ज्वरे नाड्यः क्रमेण तप्ताः उष्णजलनिःसरणमार्गवत् भवन्ति भ्रमिवत ॥ ६० ॥

## अन्यत्रापि

उष्णा वेगधरा नाडी ज्वरकोपे प्रजायते ।
उद्वेगक्रोधकामेषु भयचिन्ताश्रमेषु च ॥
भवेत्क्षीणगतिर्नाडी ज्ञातव्या वैद्यसत्तमैः ॥ ६१ ॥

ज्वरकोपे अष्टविधज्वरकोपे उष्णा उष्णस्पर्शा, वेगधरा, वेगवती, नाडी धमनी, जायते उद्वेगः उद्भ्रमः एकाकी विजने

कथं सर्वपरिग्रहशून्यो भीतिव्यागीत्यत्रं विघो व्याकुलतारूपाश्चित्तवृत्तिविशेषः विरहजन्यं दुःखम्वा, क्रोधः मानसः संतापः कामो रतिः तेषु भयम् व्याघ्रादिदर्शनाधीनचित्तवृत्तिविशेषः चिन्ता, चिन्तनम् श्रमः, परिश्रमः, तेषु वैद्यसत्तमैः भिषग्वर्यैः क्षीणगतिः दुर्बलगतिः नाडी ज्ञातव्या, इति, ॥ ६१ ॥

## प्रसंगादाह ॥

व्यायामभ्रमणे चैव चिन्तायां श्रमशोकत ।
नानाप्रभावगमना शिरा गच्छति विज्वरे ॥ ६२ ॥

व्यायामः शरीरायासजनकः पौरुषश्रमः भ्रमणं, पर्यटनं, तस्मिन् । चिन्तायां चिन्तने, श्रमशोकतः च विज्वरे, स्वस्थे मनुजे नानाप्रभावगमना, अनेकप्रभावगा, शिरा, नाडी, गच्छति, चलति, ॥ ६२ ॥

Indira Gandhi National Centre for the Arts

## अजीर्णरूपमाह ॥

अजीर्णे तु भवेन्नाडी कठिनापरितो जडा ।
प्रसन्नातु द्रुता शुद्धा त्वरिता च प्रवर्तते ॥ ६३ ॥

अजीर्णे आमपक्वादिसामान्ये, अपाके, नाडी कठिना, अकोमला, परितः उभयपार्श्वतः जडा, अनुद्यमा, प्रसन्ना तु अजीर्णाऽभाववतीतु द्रुता, अकठिना शुद्धा, अजडा, त्वरिता, शीघ्रगा, प्रवर्त्तते, ॥ ६३ ॥

# तत्र विशेषमाह

पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेज्जडा ।
असृक्पूर्णा भवेत्कोष्णा गुर्वी सामा गरीयसी ॥ ६४ ॥

पक्वाजीर्णे, परिणतेऽजीर्णे, पुष्टिहीना, पुष्टतारहिता, मन्दं मन्दं यथा स्यात्तथा वहेत् तथा जड़ा, अनुद्यमा, नाड़ी वहेत् असृक्पूर्णा, रुधिरपूरिता, कोष्णा, किञ्चिदुष्णा तथा गुर्वी भवेत् सामा, आमेनसहिता, आमकातिकेति केचित् गरीयसी, स्थूला, आमस्य गुरुतायुक्तत्वात् ॥ ६४ ॥

# प्रसङ्गाल्लक्षणज्ञानमाह

पुष्टिस्तैलगुडाहारे मांसे च लगुडाकृतिः ।
क्षीरे च स्तिमितावेगा मधुरे भेकवद्गतिः ॥ ६५ ॥

तैलगुडाहारे तैलगुडादीनामाहारादित्यर्थः पुष्टिः नाड्याः पुष्टिःप्रतीयते मांसे च मांसाहारे लगुडोदंडस्तदाकृतिः च क्षीरे क्षीरपानानन्तरं स्तिमितः मन्दः आवेगः प्रवाहो यस्याः सा स्तिमितावेगा मन्दगतिरितियावत् । मधुरे सितादिकृताहारे भेकवद्गतिः यद्यपि सिता मधुरा तथापि श्लेष्मकारिणी न मधुरं श्लेष्मणं प्रायोजीर्णशालियवाद्दते मुद्गाद्गोधूमतः क्षौद्रात् सिताया जाङ्गलामिषात् इतिभावमिश्रोक्तेः । अथवा मधुरे औद्दालिकमाक्षिकादिमधुरसाहारे भेकवद्गतिः औद्दालिकस्य मधुनः पित्तजकत्वात् ॥ ६५ ॥

रम्भागुडवटाहारे रूक्षशुष्कादिभोजनात् ।
वातपित्तार्त्तिरूपेण नाडी वहति निष्क्रमम् ॥ ६६ ॥

रम्भा कदली गुडः इक्षुविकारः वटः वडा इतिभाषाप्रसिद्धः तेषां आहारे भोजने रूक्षं निःस्नेहद्रव्यं शुष्कं आतपेनाग्निना वा यथा चिपिटकादयः तेषां भोजनात् नाडी वातपित्तार्तिरूपेण वातपित्तजनितरोगेणेव निष्क्रमम् पूर्वस्मिन्क्षणे वातस्य द्वितीये क्षणे पित्तस्येतिक्रमं त्यक्त्वा कदाचित्पूर्वस्मिन्क्षणे पित्तस्यापीति भावः वहति चलति ॥ ६६ ॥

## अथ रसज्ञानमाह.

मधुरे बर्हिगमना तिक्ते स्याद्भूलतागतिः ।
अम्ले कोष्णा प्लवगतिः कटुके भृंगसन्निभा ॥ ६७ ॥

मधुरे मिष्टपदार्थभक्षणे बर्हीं मयूरस्तद्वद्गमना तिक्ते कटुद्रव्यभोजने भूलता किंचुकः केंचुआ इतिप्रसिद्धः तद्वद्गतिः अम्लेनिम्बुकादिसेवने कोष्णा किंचिदुष्णा तथा प्लवगतिः मंडूकगतिः कटुके मरिचादिभक्षणे भृङ्गसन्निभा भ्रमरवदितस्ततः आगत्य स्वस्थानस्थितिमती ॥ ६७ ॥

कषाये कठिनाम्लाना लवणे सरलाद्रुता ।
एवं द्वित्रिचतुर्योगे नाना धर्मवती धरा ॥ ६८ ॥

कषाये हरीतक्याद्यदने कठिना कठोरा म्लाना जडा लवणे पटुरसे सरला ऋजुगतिका द्रुता शीघ्रगा एवं द्वित्रिचतुर्योगे

द्वित्रिचतुरसासंयोगादरे नानाधर्मवती अनेकगतिमती चरा नाडी भवतीतिशेषः ॥ ६८ ॥

# तथा

द्रवेति कठिना नाडी कोमला कठिनाशने ।
द्रवद्रव्यस्य काठिन्ये कोमला कठिनापि च ॥ ६९ ॥

द्रवे श्रीखण्डपानकादिपाने कठिना नाडी कठिनाशने मोदका-दिअशने कोमला मृदुस्पर्शा द्रवद्रव्यस्य काठिन्ये बर्षोपलादिद्रवद्रव्य काठिन्ये कोमला अपि च कठिना आदौ कोमलापश्चात्क-ठिनेति ॥ ६९ ॥

# क्षेपका एते श्लोकाः

अम्लैश्च मधुराम्लैश्च नाडी शीता विशेषतः ।
चिपिटैर्भृष्टद्रव्यैश्च स्थिरा मन्दतरा भवेत् ॥ ७० ॥

अम्लैः अम्लरसकैर्द्रव्यैः मधुराम्लैः मिष्टाम्लैः विशेषतो नाडी शीता शीतस्पर्शा चिपटैः पृथुकैः चिरवाइतिप्रसिद्धैः । भ्रष्टद्रव्यैः चणकवहुरीइत्यादिभिः नाडी स्थिरा मन्दतरा अतिशयेनमन्दा भवेत् ॥ ७० ॥

कूष्माण्डैर्मूलकैश्चैव मन्दामन्दा च नाडिका ।
शाकैश्च कदलैश्चैव रक्तपूर्णेव नाडिका ॥ ७१ ॥

कूष्माण्डैः बृहत्फलैः पेठाइतिप्रसिद्धैः । मूलकैश्चैव शालगकेटकैः मूली इतिभाषाप्रसिद्धैः । नाडिका मन्दमन्दा भवति । शाकैः पत्रपुष्पादिशाकैः । कदलैः कदलीफलैः च नाडिका रक्तपूर्णा इव कोष्णा भवतीत्यर्थः ॥ ७१ ॥

मांसात्स्थिरवहा नाडी दुग्धे शीता बलीयसी ।
गुडैः क्षीरैश्च पिष्टैश्च स्थिरा मन्दवहा भवेत् ॥७२॥

पिष्टैः गोधूममाषपिष्टकजातैर्द्रव्यैः ॥ ७२ ॥

अम्लेऽपि हृत्यसुस्थत्वे भवन्ति तापिताः शिराः ।
उपवासात्भवेत्क्षीणा तथा च द्रुतवाहिनी ॥
संभोगान्नाडिका क्षीणा ज्ञेया द्रुतगतिस्तथा ।
उष्णत्वं विषमावेगा ज्वरिणां दधिभोजनात् ॥७४॥

अम्ले अम्लरसभोजने असुस्थत्वे हृत्स्थत्वे सति शिराः नाड्यः तापिता उष्णाः भवन्ति उपवासात् लंघनात् क्षीणा क्षीणगतिः तथा च द्रुतवाहिनी शीघ्रगामिनी संभोगात् स्त्रीसंगात् नाडिका क्षीणा तथा द्रुतगतिः ज्ञेया ज्वरिणां ज्वरवतां दधिभोजनात् नाड्यामुष्णत्वं प्रतीयते तथा च नाडी विषमावेगा विषमवेगवती भवति ॥ ७४ ॥

## अग्निमान्द्यधातुक्षयलक्षणमाह.

मन्दाग्नेः क्षीणधातोश्च नाडी मन्दतरा भवेत् ॥

मन्दः कफाधिक्यान्मंदः अग्नि औदर्यो वह्निः यस्य तस्य क्षीणः अतिव्यवायादिना नष्टः धातुः शुक्रं यस्य तस्य, नाडी तदुक्तम् "मन्दाग्नौ क्षीणधातौ च नाडी क्षीणतमा भवेत्" । मन्दतरा, अतिशयेन मन्दा भवेत् ।

## तथा

मन्देग्नौ क्षीणतां याति नाडी हंसाकृतिस्तथा ॥७५॥

## अन्ये तु

आमाशये पुष्टिविवर्द्धनेन
भवन्ति नाड्यो भुजगाग्रवृत्ताः ।
आहारमान्द्यादुपवासतो वा
तथैव नाड्यो भुजगाग्रमानाः ॥ ७६ ॥

आमः अग्निलाघवादपक्कमन्नं, तस्य आशयः नाभिस्तनयोर्मध्यभागे ऽपक्कस्थानं तस्मिन् पुष्टिविवर्द्धनेन पुष्टिकरद्रव्यभोजनेन, नाड्यः भुजगः सर्पः तस्य अग्रम् शिरः इव वृत्तं वर्तुलाकारं यासां ताः भुजगाग्रवृत्ताः; सर्पफणाकार इव वर्तुलाइत्यर्थः आहारः भोजनम् तस्य मान्द्यात् न्यूनत्वात् अल्पभोजनकरणादितिभावः उपवासतः अनाहारात् वा भुजगः इव अग्रे अंगुष्ठमूले मानं गति प्रमाणं यासां ताः सर्पवत्गमनशीलाः सर्वफणवद्वर्तुलाकाराश्चेति ७६

## प्रसङ्गाद्दीप्ताग्निज्ञानमाह.

लध्वी भवति दीप्ताग्नेस्तथा वेगवती मता ॥ ७७ ॥

दीप्तः ज्वलितः अग्निर्यस्य तस्य दीप्ताग्नेः पुरुषस्य नाडी लघ्वी लाघवयुक्ता नातिस्यन्दा न निस्यन्देत्यर्थः तथा वेगवती जववती मता कथिता ॥ ७७ ॥

## प्रसङ्गाद्ग्रहणीमप्याह

पादे च हंसगमना करे मण्डूकसंप्लुवा ।
तस्याग्नेर्मन्दता देहे त्वथवा ग्रहणीगदः ॥ ७८ ॥

यस्य पादे दक्षिणपादवामग्रन्थिपार्श्वके हंसगमना करे अंगुष्ठमूलमणिबन्धयोर्मध्ये मण्डूकसंप्लुता भेकवद्गमना तस्यदेहे शरीरे अग्नेर्मन्दता अग्निमान्द्यं अथवा ग्रहणीगदः ग्रहणीरोगः ।७८।

# तथा

भेदेन शान्ता ग्रहणीगदेन निर्वीर्यरूपा त्वतिसारभेदे ।
विलंबिकायां प्लवगा कदाचित् आमातिसारे पृथुता जडा च७९

ग्रहणीगदेन भेदेन महता संग्रहणीरोगकेन रेचनेन नाडी शान्ता कदाचित्किञ्चिदेवज्ञायमानगमना वेगरहितेत्यर्थः अतिसारभेदे चिरातिसारिणो रेचने निर्वीर्यरूपा अतिमृदुस्यन्दा विलम्बिकायां कफवाताजीर्णजन्यरोगविशेषे कदाचित् प्लवगा मण्डूकवद्गतिः आमातिसारे अन्नाजीर्णजन्येऽतिसारे पृथुला पुष्टा जडा च जडवद्गमना च भवति ॥ ७९ ॥

Indira Gandhi National
Centre for the Arts

# अथ विसूचिकाज्ञानम्

निरोधे मूत्रशकृतो विड्ग्रहे त्वितराश्रिताः ।
विसूचिकाभिभूते च भवन्ति भेकवत्क्रमाः ॥ ८० ॥

मूत्रशकृतोः मिलितयोर्द्वयोर्मूत्रमलयोः निरोधे स्वतःस्वेच्छया धारणे तु विड्ग्रहे केवलस्य मलस्य निरोधे विसूचिकाभिभूते च इतराश्रिताः केवलमूत्रनिरोधाश्रिताः नाड्यः भेकवत्क्रमाः भवन्ति ८०॥

# प्रसङ्गादानाहमूत्रकृच्छ्रज्ञानमाह

आनाहे मूत्रकृच्छ्रे च भवेन्नाडी गरिष्ठता ॥ ८१ ॥

आनाहे मूत्रशकृतादिनिरोधके रोगविशेषे मूत्रकृच्छ्रे मूत्रस्य कृच्छ्रेण प्रवर्तके नाडी गरिष्ठता भवेत् नाड्या गुरुता स्यात् ।८१

# शूलज्ञानमाह

वातेन शूलेन मरुत्प्लुतेन सदातिवक्रा हि शिरा वहन्ति ।
ज्वालामयी पित्तविचेष्टितेन साध्मानशूलेन च पुष्टिरूपा ८२

वातेन शूलेन वातजन्यशूलेन मरुत्प्लुतेन वातोल्वणगत्याहि सदा अतिवक्राः कुटिलाः शिराः नाड्यो वहन्ति पित्तविचेष्टितेन पित्तजशूलेन ज्वालामयी भवति द्वन्द्वजशूलेन द्वन्द्वलक्षणवती साध्मानशूलेन आध्मानसहितेन शूलेन पुष्टिरूपा पुष्टियुक्ता वहति ॥ ८२ ॥

अथ प्रमेहज्ञानमाह ॥

प्रमेहे ग्रन्थिरूपा सा सुतप्ता त्वामदूषणे ॥ ८३ ॥

प्रमेहे शुक्रघटितरोगविशेषे मूत्रदोषे ग्रन्थिरूपा ग्रन्थिपर्णेव मध्ये मध्ये ग्रन्थिमतीव भवति सा नाडी आमदूषणे तु आमवाताख्ये रोगे तु सुतप्ता उष्णा भवति ॥ ८ ॥

विष विष्टम्भ गुल्मज्ञानमाह ॥

उत्पित्सुरूपा विषरिष्टकायां विष्टम्भगुल्मेन च वक्ररूपा ।
अत्यर्थवातेन अधःस्फुरन्ती उत्तानभेदिन्यसमाप्तकाले ॥८४॥

विषारिष्टिकायाम् विषेण विषभक्षणेन सर्पादिदंशेन वा रिष्टिका अकल्याणम् दुःखमितियावत् तस्यां नाडी उत्पित्सुरूपा नूतनरोगोत्पत्तिरिवापरिनिष्ठगमना विष्टम्भः आनाहः गुल्मः वायुगोला इतिप्रसिद्धो रोगः । तेन विष्टम्भगुल्मेन उत्पित्सुरूपाऽपि भूत्वा वक्ररूपा भवति अत्यर्थवातेन उपरितनोक्तयोरोगयोर्वाताधिक्यात् । नाडी अधःस्फुरन्ती अधस्तात् तिर्य्यग् भेदिनी भवति असमाप्तकाले एषां रोगाणामसम्पूर्णतादशायाम् पूर्वरूपेइत्यर्थः उ-

त्वानभेदिनी लतावदूर्ध्ववेगेन यातीत्यर्थः ऊर्ध्वगतिर्भवतीति ।८४।

## गुल्मे विशेषमाह कश्चित्.

गुल्मेन कम्पाऽथ पराक्रमेण पारावतस्येव गतिं करोति ८५

गुल्मेन कम्पा कम्पनशीला अतिचञ्चलेत्यर्थः सती नाडी अथ अनन्तरम् पराक्रमेण उद्योगातिशयेन पारावतस्य इव कपोतस्य तुल्यं गतिं करोति ॥ ८५ ॥

### अथ भगन्दरज्ञानम् ॥

व्रणेऽति कठिने देहे प्रयाति पैत्तिकं क्रमम् ।
भगन्दरानुरूपेण नाडी व्रणनिवेदने ॥
प्रयातिवातिकंरूपं नाडीपावकरूपिणी ॥ ८६ ॥

अतिकठिने देहेअपक्के वास्तौ व्रणे नाडी पैत्तिकं क्रमं प्रयाति पैत्तिकां गतिं कुरुते भगन्दरानुरूपेण भगन्दरे नाडी व्रणनिवेदने नाडीव्रणे च नसूर इतिप्रसिद्धे पावकरूपिणी उष्णा नाडी वातिकं रूपं प्रयाति ॥ ८६ ॥

### अथ वान्तादिज्ञानम् ॥

वान्तस्य शल्याभिहतस्य जन्तोर्वेगावरोधाकुलितस्यभूयः ।
गतिं विधत्ते धमनी गजेंद्रमरालमालेव कफोल्वणेन ॥ ८७ ॥

वान्तस्य कृतवमनस्य शल्यं तृणकाष्टपाषाणपांशुलोहलोष्ठास्थिवालनखपूयास्रावाऽन्तर्गर्भादिः तेन अभिहतस्य विद्धस्य वेगो मलमूत्रादीनां वेगः तस्य अवरोधो धारणं तेन आकुलितस्य व्याकुलितस्य जंतोः धमनी नाडी गजेन्द्रमरालमालेव हस्तिहंसयोर्गतिरिव गतिं विधत्ते तद्वद्गमनेतिभावः । भूयः पुनः कफोल्वणेन वृद्धकफेनापि एतयोरिवगतिर्भवतीत्यर्थः ।

# अथ नाडीस्पन्दनसंख्या

सद्यः प्रसूतस्य शिशोर्नाडी एकस्मिन्पले षट्पञ्चाशद्वारं स्पंदते ॥
क्रमशस्तदनंतरं पञ्चाशच्चत्वारिंशच्चवारं १ पले स्फुरति।
पलमितिसर्वत्रानुषञ्जनीयम् ॥ यौवने षट्त्रिंशत्स्पन्दाः ॥
प्रौढावस्थायामेकोनत्रिंशत्स्पंदाः परंच नारीणां द्वयधिकां
अन्यत्सर्वं समानम् ॥ सामान्यवृद्धावस्थायामष्टाविंशतिः ॥
अतिवृद्धस्यैकत्रिंशत् ॥

# मतांतरेण स्वस्थानां नाडीस्पंदनमाह

जन्मसमयात्सार्द्धद्वयपलकालपर्य्यन्तं नाडी चत्वारिंशच्छताधिकंवारं स्पन्दते ॥ तदूर्ध्वमेकवर्षपर्य्यन्तं सार्द्धद्वयपले काले त्रिंशदधिकंशतवारं चलति ॥ वर्षादूर्द्ध्वं द्विवर्षपर्यन्तं २॥ पले दशाधिकशत वारम् ॥ ततस्त्रिसंवत्सरं व्याप्य शतं वारम् ॥ त्रिवर्षादारभ्य सप्तवर्षपर्यन्तं नवतिवारम् ॥ ततश्चतुर्दशाब्दपर्य्यन्तं पञ्चाशीतिवारम् ॥ चतुर्दशवर्षादूर्ध्वं त्रिंशद्वर्षमभिव्याप्याशीतिवारम् ॥ त्रिंशद्वर्षादूर्ध्वं पञ्चाशद्वर्षपर्य्यंतंपञ्चसप्ततिवारम् ॥ पञ्चाशद्वर्षादशीतिवर्षपर्य्यन्तं षष्टिवारंप्रवेपते ॥ वयोऽवस्थाक्रमेण सार्द्धद्वयपले कालेऽपि नाडीनां गतिक्षयो दृश्यते ॥

इतिश्री मुरादाबादनगरनिवासिसारस्वतवंशप्रसूतविद्वद्वर
श्रीमुनिललितोपाध्यायसूनुनेंद्रप्रस्थस्थबनवारीलालायुर्वेद
विद्यालयाध्यापकेन सांख्याचार्योपाधिधारिणा
वैद्यहरिहरनाथशास्त्रिणा कृतायांनाडीविज्ञान
संकलितसंस्कृतटीकायां तृतीयोद्योतः ॥

IGNCA RAR
ACC. No. R-320